योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ८८

अष्टाशीतितमः सर्गः ८८

श्रीवसिष्ठ उवाच ।

प्राप्य संसृतिसीमान्तं दुःखाब्धेः पारमागतः ।

वीतहव्यः शशामैवमपुनर्मनने मुनिः ।। १

तस्मिंस्तथोपशान्ते हि परां निर्वृतिमागते ।

पयःकण इवाम्भोधौ स्वे पदे परिणामिनि ।। २

तथैव तिष्ठन्निःस्पन्दः स कायो म्लानिमाययौ ।

अन्तर्विरसतां प्राप्य मार्गशीर्षान्तपद्मवत् ।। ३

तस्य देहद्रुमान्तःस्थं त्यक्त्वा हृन्नीडमाययुः ।

प्रोड्डीय विहगायन्तो युन्त्रोन्मुक्ता इवासवः ।। ४

भूतेष्वेव प्रतिष्ठानि भूतानि सकलान्यलम् ।

मांसास्थियन्त्रदेहस्तु वनावनितलेऽवसत् ।। ५

चिदर्णवप्रतिष्ठा चिद्धातवो धातुषु स्थिताः ।

स्वे स्वरूपे स्थितं सर्वं मुनावुपशमं गते ।। ६

एषा ते कथिता राम विचारशतशालिनी ।

विश्रान्तिर्वीतहव्यस्य प्रज्ञयैनां विवेचय ।। ७

एवंप्रकारया चार्व्या स्वविचारणयेद्धया ।

तत्त्वमालोक्य तत्सारमातिष्ठोत्तिष्ठ राघव ।। ८

यदेतदखिलं राम भवते वर्णितं मया ।

यदिदं वर्णयाम्यद्य वर्णयिष्यामि यच्च वा ।। ९

त्रिकालदर्शिना नित्यं चिरं च किल जीवता ।

विचारितं च दृष्टं च मया तदखिलं स्वयम् ।। १०

तदेताममलां दृष्टिमवलम्ब्य महामते ।

ज्ञानमासादय परं ज्ञानान्मुक्तिर्हि लभ्यते ।। ११

ज्ञानान्निर्दुःखतामेति ज्ञानादज्ञानसंक्षयः ।

ज्ञानादेव परा सिद्धिर्नान्यस्माद्राम वस्तुतः ।। १२

ज्ञानेन सकलामाशां विनिकृत्य समन्ततः ।

शातिताशेषचित्ताद्रिर्वीतहव्यो मुनीश्वरः ।। १३

वीतहव्यात्मिका संवित्संकल्पजगतीति सा ।

अनुभूतवती दृश्यमिदमेव च तज्जगत् ।। १४

वीतहव्यो मनोमात्रं मनोहंत्वमिवैन्द्रियः ।

मनो जगदिदं कृत्स्नमन्यतानन्यते तु के ।। १५

अधिगतपरमार्थः क्षीणरागादिदोषः

सकलमलविकारोपाधिसङ्गाद्यपेतः ।

चिरमनुसृतमन्तः स्वं स्वभावं विवेकी

पदममलमनन्तं प्राप्तवान्शान्तशोकः ।। १६

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे वीतहव्यविश्रान्तिर्नामाष्टाशीतितमः सर्गः ।। ८८ ।।